# श्रीमद् भागवत रसिक कुटुंब

## दक्षिणामूर्तिस्तोत्रं अथवा दक्षिणामूर्त्यष्टकम्

**ध्यानश्लोकाः -**

**मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं(यँ) युवानं**
**वर्षिष्ठान्ते वसदृषिगणैरावृतं(म्) ब्रह्मनिष्ठैः ।**
**आचार्येन्द्रं(ङ्) करकलितचिन्मुद्रमानन्दरूपं**
**स्वात्मारामं(म्) मुदितवदनं(न्) दक्षिणामूर्तिमीडे ॥ 1॥**

**वटविटपिसमीपे भूमिभागे निषण्णं**
**सकलमुनिजनानां(ञ्) ज्ञानदातारमारात् ।**
**त्रिभुवनगुरुमीशं(न्) दक्षिणामूर्तिदेवं**
**जननमरणदुःखच्छेददक्षं(न्) नमामि ॥ 2॥**

**चित्रं(वँ) वटतरोर्मूले वृद्धाः(श्) शिष्या गुरुर्युवा ।**
**गुरोऽस्तु मौनं व्याख्यानं(म्) शिष्यास्तु छिन्न संशयाः ॥ 3॥**

**निधये सर्वविद्यानां(म्) भिषजे भवरोगिणाम् ।**
**गुरवे सर्वलोकानां(न्) दक्षिणामूर्तये नमः ॥ 4॥**

**ॐ नमः(फ्) प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।**
**निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥ 5॥**

## अथ स्तोत्रम्

विश्वं(न्) दर्पणदृश्यमाननगरीतुल्यं(न्) निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं(यँ) यथा निद्रया ।
यः(स्) साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं(म्) श्रीदक्षिणामूर्तये ॥ 1॥

बीजस्यान्तरिवाङ्कुरो जगदिदं(म्) प्राङ्निर्विकल्पं(म्) पुनः
मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यः(स्) स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं(म्) श्रीदक्षिणामूर्तये ॥ 2॥

यस्यैव स्फुरणं(म्) सदात्मकमसत्कल्पार्थकं(म्) भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं(म्) श्रीदक्षिणामूर्तये ॥ 3॥

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभस्वरं
ज्ञानं(यँ) यस्य तु चक्षुरादिकरणद्वारा बहिः(स्) स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं(ञ्) जगत्
तस्मै श्रीगुरुमूर्तये नम इदं(म्) श्रीदक्षिणामूर्तये ॥ 4॥

देहं(म्) प्राणमपीन्द्रियाण्यपि चलां(म्) बुद्धिं(ञ्) च शून्यं(वँ) विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं(वँ) वादिनः ।
मायाशक्तिविलासकल्पितमहा व्यामोहसंहारिणे

तस्मै श्रीगुरुमूर्तये नम इदं(म्) श्रीदक्षिणामूर्तये ॥ 5॥

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः(ख्) करणोपसंहरणतो योऽभूत्सुषुप्तः(फ्) पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः(फ्) प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं(म्) श्रीदक्षिणामूर्तये ॥ 6॥

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तः(स्) स्फुरन्तं(म्) सदा ।
स्वात्मानं(म्) प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदंश्रीदक्षिणामूर्तये ॥ 7॥

विश्वं(म्) पश्यति कार्यकारणतया स्वस्वामिसंबन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 8॥

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः(फ्) पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 9॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन् स्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।

सर्वात्मत्वमहाविभूतिसहितं(म्) स्यादीश्वरत्वं स्वतः
सिद्ध्येत्तत्पुनरष्टधा परिणतं(ञ्) चैश्वर्यमव्याहतम् ॥ 10॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छङ्करभगवतः(ख्) कृतौ दक्षिणामूर्त्यष्टकं सम्पूर्णम् ।